# Shrirama Raghava Stotram

# શ્રીરામરાઘવસ્તોત્રમ્

## Document Information

Text title : Rama Raghava Stotram

File name : rAmarAghavastotram.itx

Category : raama, stotra, shrIdharasvAmI

Location : doc_raama

Transliterated by : NA

Proofread by : NA

Description/comments : From shrIdhara sandesha

Latest update : November 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 10, 2022

*sanskritdocuments.org*

# શ્રીરામરાઘવસ્તોત્રમ્

(વિબુધપ્રિયાવૃત્તમ્)

આદિકાવ્યસુગાનસૌરસલોલસૌખ્યપરાત્પર
    રાવણાર્દિતદેવબન્ધવિમોચનાય નૃદેહભૃત્ ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
    રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૧॥

ભાનુવંશવિભૂષણોત્તમલોકપાલ જગદ્ગુરો
    લક્ષ્મણાગ્રજ સત્યનિષ્ઠસુકોસલેન્દ્ર જગત્પતે ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
    રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૨॥

તાટકાન્તક યજ્ઞરક્ષક કૃપાકર
    બાહુઘાતક દેવસંસ્તુત તાપસોત્તમતોષક ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
    રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૩॥

મારકોટિસુવર્ણસુન્દરકોટિશઃ શશિભાસુર
    પુણ્યપાવન પાદપાંસુસમુદ્ધૃતર્ષિસતીસ્તુત ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
    રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૪॥

ચાપભઞ્જન ગર્વશૂન્યવિદેહવન્દિત સદ્ગુરો
    આદિશક્તિવિદેહજાકરસેવિતાખિલમઙ્ગલ ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
    રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૫॥

ભક્તગર્વવિનાશકૃત્કરુણાનિદાનશિવઙ્કર
    જામદગ્ન્યકલાપકર્ષક વિશ્વવન્દ્ય જગત્પતે ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં

રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૬॥

તાતભાષિતપાલનોન્મુખત્યક્તરાજ્યવનેચર
ગૂહકાર્ચિત ગાઙ્ગપારિત કૈકયીસુતસંસ્તુત ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૭॥

દૂષણાદિખરાદિનાશક હેમરાક્ષસમારક
પક્ષિમોક્ષદ ભક્તિદત્તકિરાતિનીફલસેવિત ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૮॥

વજ્રદેહકપીન્દ્રવન્દિત વાલિબન્ધુહિતઙ્કર
વાયુનન્દનભાષિતસ્વસુદારશોધનસુશ્રુત ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૯॥

તાપસોત્તમવન્દ્ય શઙ્કરગેય વાનરયૂથપ
દુષ્ટરાક્ષસસૈન્યનાશક ધર્મપાલ સુખોદય ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૧૦॥

લોકકણ્ટકરાવણાદિકદુષ્ટવંશનિબર્હણ
સ્વાઙ્ઘ્રિસેવિવિભીષણાય તુ રાજ્યદાનસુખઙ્કર ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૧૧॥

ભક્તપાલન ભક્તવત્સલ સત્યસન્ધ દયામ્બુધે
ભક્તદૈન્યકુઠારદુઃખવિદાર સર્વશુભઙ્કર ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૧૨॥

જાનકીનિજશક્તિમણ્ડિતધર્મરાજ્યધુરન્ધર
બ્રહ્મરૂપ સદૈવ ચિદ્ઘન નિત્યસત્ય સુખાકર ।
રામ રાઘવ રામ રાઘવ રામ રાઘવ પાહિ માં
રામ રાઘવ રામ રાઘવ રામ રાઘવ શાધિ મામ્ ॥ ૧૩॥

ઇતિ શ્રીશ્રીધરસ્વામીવિરચિતં શ્રીરામરાઘવસ્તોત્રં સમ્પૂર્ણમ્ ।

સ્થલ ગિરિનાર રામમન્દિર

રામનવમી સંવત્સરઃ ઃ ૧૯૪૬

શ્રીધર - સન્દેશ

*Shrirama Raghava Stotram*

pdf was typeset on November 10, 2022

Please send corrections to *sanskrit@cheerful.com*